# संस्कृतवार्ता:

**दिनाङ्क :-21.02.2025**

**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री / सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां भारतमण्डपे 'सोल्' इति 'स्कूल ऑफ अल्टीमेट लीडरशिप कॉन्क्लेव' इत्येतस्य सम्मेलनस्य प्रथम-संस्करणस्य उद्घाटनं करिष्यति। अत्र भूटान-देशस्य प्रधानमन्त्री दाशो-त्शेरिंग-तोबगे सम्मानिताथिति-रूपेण सम्मेलनमिदं संबोधयिष्यति। अस्माकं वार्ताहर: सूचयति यति दिवसद्वयात्मके अस्मिन् सम्मेलने राजनीति-खेल-कला-संचारतन्त्र-व्यवसायाध्यात्मिक-सामाजिकादि-क्षेत्रै: संबद्धा: सुविशिष्टा: अतिथय: स्व-स्व-जीवन-चरितं जनै: सह विनिमयीकरिष्यन्ति।

**प्रधानमन्त्री / मराठीसाहित्यसम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्याम् अद्य अष्टनवति-तमस्य अखिल-भारतीय-मराठी-साहित्य-सम्मेलनस्य उद्घाटनं करिष्यति। ध्यानास्पदम् अस्ति यत् सर्वकारेण साम्प्रतं मराठी शास्त्रीय-भाषासु सम्मेलिता। त्रि-दिवसीये अस्मिन् सम्मेलने चर्चा:, पुस्तक-प्रदर्शनी, सांस्कृतिक-कार्यक्रमा: इत्यादय: च आयोजयिष्यन्ते।

**दिल्ली / मन्त्रिमण्डलम्**

दिल्ली-सर्वकारेण 'आयुष्मान्-भारत-स्वास्थ्य-बीमा-योजनां' प्रवर्तयितुं निर्णीतम्। गतसायं पदभार-ग्रहणानन्तरं दिल्ल्या: मुख्यमन्त्री रेखा गुप्ता वार्ताहरान् एतद् असूचयत्। तत: प्राक् सा दिल्ली-शासनस्य प्रथमस्य नूतन-मन्त्रिमण्डलीयोपवेशनस्य अध्यक्षतां कृतवती। सा अवदत् यत् विधानसभाया: प्रथमे उपवेशने चतुर्दश नियन्त्रक-महालेखापरीक्षक-विवरणानि प्रस्तोष्यन्ते।

**जयशंकर:**

विदेशमन्त्री डॉ. सुब्रह्मण्यम् जयशंकर: वैश्विक-भू-राजनीतिक-स्थिते: जटिलतां, संकेन्द्रिता: अपूर्ति-शृङ्खला:, व्यापार-वित्त-शस्त्रीकरणम् इत्यादीन् अभिलक्ष्य चिन्तां प्रकाशितवान्। असौ गतवासरे दक्षिणाफ्रीकाया: जोहान्सबर्गे जी-विंशति-विदेशमन्त्रिणाम् एकम् उपवेशनं सम्बोधयति स्म।

**जयशंकर: / रूसीय-विदेशमन्त्री**

विदेशमन्त्री डॉ. सुब्रह्मण्यम् जयशंकर: गतदिने दक्षिणाफ्रीकाया: जोहान्सबर्गे रूसीय-विदेशमन्त्रिणा सर्गेई-लावरोवेण समं भाषितवान्। उभौ अपि विदेशमन्त्रिणौ भारत-रूस-द्विपक्षीय-सहयोग-सम्बद्धां प्रगतिं समीक्षितवान्। एतदतिरिच्य सद्यस्तन-यूक्रेन-घटना-क्रमम् अपि उभौ समीक्षितवन्तौ।

भारत-बाङ्गलादेशौ

भारत-बाङ्गलादेश-सीमा-समन्वय-सम्मेलनस्य पञ्चपञ्चाशतमं निदेशकस्तरीयं सम्मेलनं ह्य: दिल्ल्यां सम्पन्नम्। सम्मेलनावधौ सीमापारापराधेषु सीम्नि वेष्टनम् इत्यादिषु विषयेषु उभयो: देशयो: मध्ये विस्तृता व्यापकी च चर्चा समनुष्ठिता। सम्मेलनान्तरं वार्ताहरान् संसूचयन् सीमा-सुरक्षा बलस्य निदेशक: दलजीतसिंहचौधरी उक्तवान् गतवर्षस्य अगस्तमासस्य पञ्चदिनाङ्कात् पश्चादेव भारत-बाङ्गलादेशयो: सीम्नि अवैधप्रवेशे न्यूनता समङ्किता।

उत्तरप्रदेश: / कारागारा:

उत्तरप्रदेशस्य विभिन्नेषु कारागारेषु बद्धा जना: अद्य महाकुम्भ-गङ्गास्नान-लाभम् अवाप्स्यन्ति। स्नान-व्यवस्था तदीय-कारागार-प्राङ्गणेषु प्रकल्पितास्ति।

क्रिकेट्

'आई.सी.सी.-चैंपियन्स्-ट्रॉफी' इत्येतस्या: क्रिकेट्-स्पर्धा-मालिकाया: अ-वर्गीये द्वन्द्वे गतरात्रौ दुबई-इंटरनेशनल्-क्रिकेट्-क्रीडाङ्गणे स्वीये प्रथमे द्वन्द्वे भारतेन बांग्लादेश-दलं षड्भि: क्रीडकै: पराजितम्। अद्य अपराह्णे पाकिस्ताने कराच्यां ब-वर्गीये द्वन्द्वे अफगानिस्तानं दक्षिणाफ्रीका-दलं सम्मुखीकरिष्यति।

।।इति वार्ता:।।